# Kalika Upanishad

# કાલિકોપનિષત્

## Document Information

Text title : kAlikopaniShat

File name : kAlikopaniShat.itx

Category : upanishhat, devii, devI, upanishad, dashamahAvidyA

Location : doc_upanishhat

Proofread by : Kasturi navya sahiti kasturinsahiti at gmail.com

Description-comments : aprakAshitA upaniShadaH

Latest update : March 20, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 20, 2020

*sanskritdocuments.org*

# કાલિકોપનિષત્

ॐ અથ દેનં(?) બ્રહ્મરન્ધ્રે બ્રહ્મરૂપિણીમાપ્નોતિ । સુભગાં ત્રિગુણિતાં મુક્તાસુભગાં કામરેફેન્દિરાસમસ્તરૂપિણીમેતાનિ ત્રિગુણિતાનિ તદનુ કૂર્ચબીજં વ્યોમષષ્ઠસ્વરાં વિન્દુમેલનરૂપાં તદ્દ્વયં માયાદ્વયં દક્ષિણે કાલિકે ચેત્યભિમુખગતાં તદનુ બાઞ્જસપ્તકમુચ્ચાર્ય બૃહદ્ભાનુજાયામુચ્ચરેત્ । સ તુ શિવમયો ભવેત્ । સર્વસિદ્ધિશ્વરો ભવેત્ । ગતિસ્તસ્યાસ્તીતિ । નાન્યસ્ય ગતિરસ્તાતિ । સ તુ વાગીશ્વરઃ । સ તુ નારીશ્વરઃ । સ તુ દેવેશ્વરઃ । સ તુ સર્વેશ્વરઃ । અભિનવજલદસઙ્કાશા ઘનસ્તની ભટિહવેદષ્ટા શવાગના કાલિકા ધ્યેયા । ત્રિણેણં પઞ્ચકોણં નવકોણં પદ્મમ્ । તસ્મિન્ દેવી સર્વાઙ્ગેઽભ્યર્ચ્ય તદિદં વાઙ્ગં કાલી કાપાલિની કુલ્લા કુરુકુલ્લા વિરોધિની વિપ્રચિત્તા ઉગ્રા ઉગ્રપ્રભા દીપ્તા નીલા ઘના બલાકા ભાત્રા મુદ્રાઽમિતા ચૈવ પઞ્ચદશકોણગાઃ । બ્રાહ્મી નારાયણી માહેશ્વરી કૌમારી । અપરાજિતા વારાહી નારસિંહિકા ચેત્યષ્ટપત્રગાઃ । પોડશમ્વરભેદેન પ્રથમેન મન્વવિભાગઃ । તન્મૂલેનાવાહનં તેનૈવ પૂજનમ્ । ય એવં મન્ત્રરાજં નિયમેન વા લક્ષમાવર્તયતિ સ પાપ્માનં હન્તિ । સ બ્રહ્મત્વં ભજતિ । સઃ અમૃતત્વં ભજતિ । સ આયુરારોગ્યમૈશ્વર્યં ભજતિ । સદા પઞ્ચમકારેણ પૂજયેત્ । સદા ગુરુભક્તો ભવેત્ । સદા દેવભક્તો ભવેત્ । ધર્મિષ્ઠતાં પુષ્ટિમહતવાચં વિપ્રા લભન્તે । મન્ત્રજાપિનો હ્યાત્મા વિદ્યાપ્રપૂરિતો ભવતિ । સ જીવન્મુક્તો ભવતિ । સ સર્વશાસ્ત્રં જાનાતિ । સ સર્વપુણ્યકારી ભવતિ । સ સર્વયજ્ઞયાજી ભવતિ । રાજાનો દાસતાં યાન્તિ । જપ્ત્વા સ સર્વમેતં મન્ત્રરાજં સ્વયં શિવ એવાહમિત્યણિમાદિવિભૂતીનામીશ્વરઃ કાલિકાં લભેત્ ॥

આવયોઃ પાત્રભૂતઃ સન્ સુકૃતી ત્યક્તકલ્મષઃ ।
જીવન્મુક્તઃ સ વિજ્ઞેયો યસ્મૈ લબ્ધા હિ દક્ષિણા ॥

દશાંશં હોમયેત્તદનુ તર્પયેત્ । અથ હૈકે

યજ્ઞાન્કામાનદ્વૈતજ્ઞાનાદીનનિરુદ્ધસરસ્વતીતિ । અથ હૈષઃ
કાલિકામનુજાપી યઃ સદા શુદ્ધાત્મા જ્ઞાનવૈરાગ્યયુક્તઃ શામ્ભવીદીક્ષાસુ
રક્તઃ શાક્તાસુ । યદિ વા બ્રહ્મચારી રાત્રૌ નગ્નઃ સર્વદા મધુનાઽશક્તો
મનસા જપપૂજાદિનિયમવાન્ । યોષિત્પ્રિયકરો ભગોદકેન તર્પણં
તેનૈવ પૂજનં કુર્યાત્ । સર્વદા કાલિકારૂપમાત્માનં વિભાવયેત્ ।
સ સર્વદા યોષિદાસક્તો ભવેત્ । સ સર્વહત્યા તરતિ તેન મધુદાનેન ।
અથ ષઞ્ચમકારેણ સર્વમાયાદિવિદ્યાં પશુધનધાન્યં સર્વેશત્વં
ચ કવિત્વં ચ । નાન્યઃ પરમઃ પન્થા વિદ્યતે મોક્ષાય જ્ઞાનાય
ધર્માધર્માય । તત્સર્વં ભૂતં ભવ્યં યત્કિઞ્ચિદ્દૃશ્યમાનં
સ્થાવરજઙ્ગમં તત્સર્વં કાલિકાતન્ત્રે ઓતં પ્રોતં વેદ ।
ય એવં મનુજાપી સ પાપ્માનં તરતિ । સ ભ્રૂણહત્યાં તરતિ ।
સોઽગમ્યાગમનં તરતિ । સ સર્વસુખમાપ્નોતિ । સ સર્વં જાનાતિ ।
સ સર્વસંન્યાસઈ ભવતિ । સ વિરક્તો ભવતિ । લ્સ સર્વવેદાધ્યાયી
ભવતિ । સ સર્વમન્ત્રજાપી ભવતિ । સ સર્વશાસ્ત્રવેત્તા ભવતિ ।
સ સર્વજ્ઞાનકારી ભવતિ । સ આવયોર્મિત્રભૂતો ભવતિ । ઇત્યાહ ભગવાન્
શિવઃ । નિર્વિકલ્પેન મનસા સ વન્દ્યો ભવતિ ॥

અથ હૈનામ્ ।
મૂલાધારે સ્મરેદ્દિવ્યં ત્રિકોણં તેજસાં નિધિમ્ ।
શિખા આનીય તસ્યાગ્નેરથ તૂર્ધ્વં વ્યવસ્થિતા ॥

નલિતોયદમધ્યસ્થા વિદ્યુલ્લેખેવ ભાસ્વરા ।
નીવારશૂકવત્તન્વી પીતા ભાસ્વત્યણૂપમા ॥

તસ્યાઃ શિખાયા મધ્યે પરમાત્મા વ્યવસ્થિતઃ ।
સ બ્રહ્મા સ શિવઃ સેન્દ્રઃ સોક્ષરઃ પરમઃ સ્વરાટ્ ॥

સ એવ વિષ્ણુઃ સ પ્રાણઃ સ કાલોઽગ્નિઃ સ ચન્દ્રમાઃ ।
ઇતિ કુણ્ડલિનીં ધ્યાત્વા સર્વપાપૈઃ પ્રમુચ્યતે ॥

મહાપાતકેભ્યઃ પૂતો ભૂત્વા સર્વમન્ત્રસિદ્ધિં કૃત્વા ભૈરવો ભવેત્ ।
મહાકાલભૈરવોઽસ્ય ઋષિઃ । અનુષ્ટુપ્ છન્દઃ (ઉષ્ણિક્ છન્દઃ)
કાલિકા દેવતા । હ્રીં બીજં હૂં શક્તિઃ ક્રીં કીલકં અનિરુદ્ધસરસ્વતી
દેવતા । કવિત્વે પાણ્ડિત્યાર્થે (ધર્માર્થકામમોક્ષાર્થે) જપે વિનિયોગઃ ।
ઇત્યેવમૃષિચ્છન્દોદૈવતં જ્ઞાત્વા મન્ત્ર સાફલ્યમશ્નુતે ।

અથર્વવિદ્યાં પ્રથમમેકં દ્વયં ત્રયં વા નામદ્વયસમ્પુટિતં
કૃત્વા યોજયેત્ । ગતિમ્તમ્યામ્તીતિ । નાન્યસ્ય ગતિરમ્તીતિ । ૐ સત્યમ્ ।
ૐ તત્સત્ ॥

અથ હૈનં ગુરું પરિતોષ્યૈનં મન્ત્રરાજં ગૃહ્ણીયાત્ । મન્ત્રરાજં
ગુરુસ્તમપિ શિષ્યાય સત્કુલીનાય વિદ્યાભક્તાય સુવેષાં સ્ત્રિયં
સ્પૃષ્ટ્વા સ્વયં નિશાયાં નિરુપદ્રવઃ પરિપૂજ્ય એકાકી શિવગેહે
લક્ષં તદર્ધં વા જપિત્વા દદ્યાત્ । ૐ ૐ સત્યં સત્યં સત્યમ્ ।
નાન્યપ્રકારેણ સિદ્ધિર્ભવતિ । અથાહ વૈ કાલિકામનોસ્તારામનોસ્ત્રિપુરામનોઃ
સર્વદુર્ગામનોર્વા સ્વરૂપસિદ્ધિરેવમિતિ શિવમ્ ॥

(શાક્ત-ઉપનિષદઃ)

ઇત્યાથર્વણે સૌભાગ્યકાણ્ડે કાલિકોપનિષત્ સમાપ્તા ।

Proofread by Kasturi navya sahiti

---

*Kalika Upanishad*

pdf was typeset on March 20, 2020

Please send corrections to *sanskrit@cheerful.com*